# Shri Ganesha Stotram Shrisamasasamvatsarakritam

# શ્રીસમાસસંવત્સરકૃતં શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : Shri Ganesha Stotram Shrisamasasamvatsarakritam

File name : gaNeshastotramshrIsamAsasaMvatsarakRRitaM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 19 | 8.19 9-33||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# શ્રીસમાસસંવત્સરકૃતં શ્રીગણેશસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
સમાસસંવત્સર ઉવાચ ।
નમસ્તે ધૂમ્રવર્ણાય વક્રતુણ્ડાય ઢુણ્ઢયે ।
હેરમ્બાય પરેશાય વિઘ્નેશાય નમો નમઃ ॥ ૯॥
શૂર્પકર્ણાય સર્વેષાં પૂજ્યાય પરમાત્મને ।
લમ્બોદરાય સર્વાદિપૂજ્યાય તુ નમો નમઃ ॥ ૧૦॥
અનાથાનાં સુનાથાય પાત્રે હર્ત્રે નમો નમઃ ।
કર્ત્રે ત્રિગુણરૂપાય ગુણહીનાય તે નમઃ ॥ ૧૧॥
આદિમધ્યાન્તસંસ્થાયાદિમધ્યાન્તવિવર્જિત ।
ગણેશાય ગણાનાં તે ચાલકાય નમો નમઃ ॥ ૧૨॥
બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મભ્યો બ્રહ્મદાયિને ।
બ્રહ્મણે બ્રહ્મભૂતાય બ્રહ્મિષ્ઠાય નમો નમઃ ॥ ૧૩॥
સિદ્ધિબુદ્ધિપ્રદાત્રે તે સિદ્ધિબુદ્ધિમયાય ચ ।
સિદ્ધિબુદ્ધિપતે તુભ્યં સર્વેશાય નમો નમઃ ॥ ૧૪॥
અનન્તવિભવાયૈવાનન્તમાયાપ્રચારિણે ।
માયિને માયિનાં મોહદાત્રે માયાસ્વરૂપિણે ॥ ૧૫॥
શાન્તિયોગમયાયૈવ શાન્તિયોગધરાય તે ।
શાન્તિયોગપ્રદાત્રે ચ યોગેશાય નમો નમઃ ॥ ૧૬॥
કિં સ્તૌમિ ત્વાં ગણાધીશ ચિન્તામણિસ્વરૂપિણે ।
યોગિનઃ શાન્તિમાપન્ના વેદા યત્ર વિશેષતઃ ॥ ૧૭॥
અતો નમામ્યહં નાથ તેન તુષ્ટો ભવ પ્રભો ।
વરાન્ દેહિ સ્વકાર્યાણાં સિદ્ધિદાન્ સુખદાયકાન્ ॥ ૧૮॥
ભક્તિં તે ચરણે નિત્યં દેહિ સર્વભયાપહામ્ ।
કાલમાનકરં ઢુણ્ઢે વીર્યં દેહિ સ્વભાવજમ્ ॥ ૧૯॥
કર્મ માસાદિષુ પ્રાજ્ઞૈઃ કૃતં તચ્છુભદં ભવેત્ ।

સાક્ષિત્વં કર્મણાં દેહિ સાધુપાદપ્રપૂજનમ્ ॥ ૨૦॥
એવમુક્ત્વા પ્રણેમુસ્તં માસાઃ સંવત્સરાન્વિતાઃ ।
તાનુવાચ ગણાધ્યક્ષો વચઃ સ્તોત્રેણ તોષિતઃ ॥ ૨૧॥
(ફલશ્રુતિઃ)
શ્રીગણેશ ઉવાચ ।
યદ્યત્ સમ્પ્રાર્થિતં માસાઃ સંવત્સર તથાસ્તુ વૈ ।
સર્વગાઃ કાલરૂપસ્થા ભવિષ્યથ ન સંશયઃ ॥ ૨૨॥
સૂર્યેણ સંયુતાઃ સર્વે દ્વાદશદેહધારિણા ।
ફલદાઃ કર્મણાં ચૈવ ભવિષ્યથ વિશેષતઃ ॥ ૨૩॥
બ્રહ્માર્પણતયા કર્મ યદ્ભવત્સુ કૃતં નરૈઃ ।
અન્તે સલોકતાં તેભ્યો દાતારશ્ચ ભવિષ્યથ ॥ ૨૪॥
યાથાતથ્યવિભાગેન સાક્ષિણઃ સર્વજન્મિનામ્ ।
ભવિષ્યથ તથા ભક્તા મયિ મોહવિવર્જિતાઃ ॥ ૨૫॥
આદિત્યેન પરિત્યક્તોઽધિમાસસ્ત્વં ભવિષ્યસિ ।
દેવતાઽહં ત્વદીયે તુ કર્મણાં ફલદાયકઃ ॥ ૨૬॥
સર્વેષુ મલરૂપં યત્ કૃતં માસેષુ માનવૈઃ ।
નાનાભાવયુતં તેભ્યોઽહં ભવામિ ફલપ્રદઃ ॥ ૨૭॥
ત્વદીયે કાલભાવે તુ કર્મ યન્ માનવૈઃ કૃતમ્ ।
નાનાભાવયુતં તેભ્યોઽહં ભવામિ ફલપ્રદઃ ॥ ૨૮॥
ભવત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદં ભવેત્ ।
પઠતાં શ‍ૃણ્વતાં નૃણાં ભાવપૂરં ન સંશયઃ ॥ ૨૯॥
કાલદોષભવં પાપં કાલસ્યોલ્લઙ્ઘનાદિકમ્ ।
હરામ્યનેન સ્તોત્રેણ તુષ્ટોઽહં ભુક્તિમુક્તિદઃ ॥ ૩૦॥
એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો ગણવલ્લભઃ ।
સંવત્સરઃ પ્રસન્નાત્મા સ્વકાર્યનિરતોઽભવત્ ॥ ૩૧॥
માસાઃ સ્વકાર્યસામર્થ્યયુક્તા હૃષ્ટા બભૂવિરે ।
કાલભાવધરાઃ સર્વે સાક્ષિણઃ સર્વકર્મણામ્ ॥ ૩૨॥
એતત્ સંવત્સરસ્યૈવ સમાસસ્ય ચરિત્રકમ્ ।
યઃ પઠેચ્છ‍ૃણુયાદ્વાઽપિ સ કાલસુખમાપ્નુયાત્ ॥ ૩૩॥

ઇતિ શ્રીસમાસસંવત્સરકૃતં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૧૯ । ૮.૧૯ ૯-૩૩॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 19 . 8.19 9-33..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Ganesha Stotram Shrisamasasamvatsarakritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*